वित्तं, क्ली, (विद + क्तः । "वित्तो भोगप्रत्यययोः ।" ८ । २ । ५८ । इति साधुः । ) धनम् । इत्यमरः ॥ ( यथा, मनुः । ८ । ३६ ।
"अनृतन्तु वदन् दण्ड्यः स्ववित्तस्यांशमष्टमम् ।
तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलाम् ॥")

वित्तः, त्रि, ( विद् + क्तः । "नुदविदेति ।" ८ । २ । ५६ । इति पक्षे नत्वाभावः । ) विचारितः । विख्यातः । इत्यमरः ॥ लब्धः । इति तट्टीकायां रामाश्रमः ॥ ( विख्यातः । अत्र वित्तो भोगप्रत्यययोः इति साधुः । यथा च पाणिनिः ।
"तेन वित्तश्चुञ्चुप्चणपौ ।" ५ । २ । २६ ॥ )

वित्तदः, त्रि, धनदाता । वित्तं ददाति य इत्यर्थे डप्रत्ययेन निष्पन्नः ॥

वित्तिः, स्त्री, (विद् + क्तिन् ।) विचारः । लाभः । ( यथा, वाजसनेयसंहितायाम् । १८ । १४ ।
"मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ।" ) सम्भावना । इति मेदिनी । ते, ५८ ॥ ज्ञानम् । इति हेमचन्द्रः ॥

वित्तेशः, पुं, (वित्तानामीशः ।) कुवेरः । यथा,—
"त्वं ब्रह्मा हरिहरसंज्ञितस्त्वमिन्द्रो
वित्तेशः पितृपतिरम्बुपः समीरः ।
सोमोऽग्निर्गगनमहीधरोऽब्धिरूपः
किन्त्वयं सकलतरस्वरूपधाम्नः ॥"
इति मार्कण्डेयपुराणे । १०८ । ३७ ॥

वित्रस्तः, त्रि, त्रासयुक्तः । विपूर्व्वत्रसधातोः क्तप्रत्ययेन निष्पन्नः ॥

वित्रासः, पुं, भयम् । विपूर्व्वत्रसधातोर्भावे घञ्प्रत्ययेन निष्पन्नः ॥ ( यथा, भागवते । १० । ५० । १६ ।
"ततोऽभूत् परसैन्यानां हृदि वित्रासवेपथुः ॥")

वित्सनः, पुं, वृषभः । इति शब्दचन्द्रिका ॥

विथ, ऋ ङ याचे । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-द्विक०-सेट् ।) वेथते । इति दुर्गादासः ॥

विथुरः, पुं, ( व्यथते इति । व्यथ भयचलनयोः । "व्यथेः संप्रसारणं किच्च ।" उणा० १ । ४० । इति उरच् । स च कित् सम्प्रसारणञ्च धातोः ।) चौरः । राक्षसः । इत्युणादिकोषः ॥ ( स्त्री, भर्तृवियुक्ता नारी । यथा, ऋग्वेदे ।१।८७।३।
"प्रैषामज्मेषु विथुरेव रेजते भूमिः ॥
"विथुरेव यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालम्बा सती कम्पते तद्वत् ।" इति तद्भाष्ये सायणः ॥ )

विथ्या, स्त्री, गोजिह्वा । इति शब्दचन्द्रिका ॥

विद, ऌ य श औ लाभे । इति कविकल्पद्रुमः ॥ ( तुदा०-उभ०-सक०-अनिट् । ) ऌ, अविदत् । य श ञ, विन्दति विन्दते । औ, वेत्ता । इति दुर्गादासः ॥

विद, क ङ ञ चेतनाख्यानवासवादे । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-उभ०-च-सक०-वासे स्थैर्य्ये च अक०-सेट् । ) चेतना ज्ञानम् । वादः स्थैर्य्यम् । क ङ, वेदयते प्राज्ञं धीरः जानातीत्यर्थः । वेदयते स्वार्थं लोकः आख्यातीत्यर्थः । वेदयते तीर्थे साधुर्वसतीत्यर्थः । वेदयते वृक्षः स्थिरः स्यादित्यर्थः । ञ, वेदयति वेदयते । केचित्तु वादं न पठन्ति । चेतनाख्याने वेदनेति पठित्वा वेदयते दुःखः व्यथते इत्यर्थः । इत्युदाहरन्ति । अस्माच्च परस्मैपदमनन्यमाना जिता सपत्नेन निवेदयिष्यत इति निवेदनं करोतीत्यर्थे णौ समादधते । इति दुर्गादासः ॥

विद, ङ धौ मीमांसे । इति कविकल्पद्रुमः ॥ ( रुधा०-आत्म०-सक०-अनिट् । ) मीमांसो विचारणम् । ङ ध, विन्ते प्राज्ञं धीरः । औ, वेत्ता । इति दुर्गादासः ॥

विद, य ङ औ भावे । इति कविकल्पद्रुमः ॥ ( दिवा०-आत्म०-अक०-अनिट् । ) भावः सत्ता स चेह विद्यमानतैव । य ङ, विद्यते विष्णुः । औ, वेत्ता । इति दुर्गादासः ॥

विद, ल मतौ । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-सक०-सेट् । ) ल, वेत्ति । इति दुर्गादासः ॥

विदंशः, पुं, (वि + दंश + घञ् ।) अवदंशः । इति राजनिर्घण्टः ॥

विदः, पुं, पण्डितः । विदधातोः कर्त्तरि कप्रत्ययेन निष्पन्नः ॥

विदग्धः, त्रि, ( वि + दह + क्तः । ) नागरः । इति त्रिकाण्डशेषः ॥ ( यथा देवीभागवते । ६ ।
"विदग्धाया विदग्धेन सङ्गमो गुणवान् भवेत् ॥")
निपुणः । इति त्रिकाण्डशेषः ॥ ( यथा आर्य्यासप्तशत्याम् । ५०६ ।
"भिन्नं न सुखं नाङ्गं न पश्यती चरणाः पराग्रैव ।
अस्पृष्टतैव नलिन्या विदग्धमधुपेन मधु पीतम् ॥")
पण्डितः । इति शब्दरत्नावली ॥ ( विशेषेण दग्धः । यथा, सुश्रुते । ४ । १ ।
"शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः ।
अविदग्धः शमं याति विदग्धः पाकमेति च ॥")

विदग्धता, स्त्री, विदग्धत्वम् । विदग्धस्य भाव इत्यर्थे ताप्रत्ययेन निष्पन्ना ॥

विदग्धा, स्त्री, (विदग्ध + टाप् ।) परकीयान्तर्गतनायिकाभेदः । यथा । गुप्ताविदग्धालक्षिताकुलटानुशयानासुदिताप्रभृतीनां परकीयाया एवान्तर्भावः । अस्या लक्षणम् । वाक्कौशलयुक्तत्वम् । सा च द्विविधा । वाग्विदग्धा क्रियाविदग्धा च । प्रथमा यथा,—
"निविड़तमतमालमञ्जुवल्ली-
विचकिलराजिविराजितोपकण्ठे ।
पथिकसमुचितस्तवाद्य तीव्रे
सवितरि तत्र सरित्तटे निवासः ॥"
द्वितीया यथा,—
"दासाय भवनधार्थे वदरीमपनेतुमादिशति ।
हैमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥"
इति रसमञ्जरी ॥

विदथः, पुं, (वेत्तीति । विद + "रुविदिभ्यां ङित् ।" उणा० ३ । ११६ । इति अथः । स च ङित् । ) योगी । व्रती । इति मेदिनी ।, थे, २४ ॥ (यज्ञः । इति निघण्टुः । ३ । १७ । "विद ज्ञाने विद विचारणे विद्लृ लाभे विद सत्तायाम् । 'रुदिविदिभ्यां ङित् ।' इति अथप्रत्ययः । ज्ञायते हि यज्ञः । लभते हि दक्षिणादिरत्र । विचार्य्यते हि विद्वद्भिः । भावयत्यनेन फलम् ॥" इति तत्र देवराजयज्वा ॥ * ॥ वेदितव्ये, त्रि । यथा, ऋग्वेदे । ३ । २७ । ७ ।
"होता देवो अमर्त्यः पुरस्तादेति मायया ।
विदथानि प्रचोदयन् ॥" )

विदन्, [त्] त्रि, पण्डितः । विदधातोः शतृप्रत्ययेन निष्पन्नः ॥

विदरं, क्ली, ( विदीर्य्यतीति । वि + दॄ + अच् । ) विषसारकम् । इति शब्दचन्द्रिका । फणीमनसा इति भाषा ॥ (विदीर्णे, त्रि । यथा, कामन्दकीये नीतिसारे । १६ । १० ।
'अल्पद्रुमोपला च्छिन्ना लतिका विदरा खिरा ।
निःशर्करा च निःपङ्का सापसारा च वारिभूः ॥')

विदरः, पुं, (वि + दॄ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) विदरणम् । फाटन इति चेरण इति च भाषा । तत्पर्य्यायः । स्फुटनम् २ भिदा ३ । इत्यमरः ॥ दारणम् ४ विदारणम् ५ । इति शब्दरत्नावली ॥

विदर्भः, पुं, स्त्री, ( विशिष्टा दर्भाः कुशा यत्र । ) कुण्डिननगरम् । इति हेमचन्द्रः ॥ स तु वङ्गदेशस्य दक्षिणपश्चिमे वर्त्तते अधुना वड़नागपुर इति ख्यातः ॥ * ॥ यथा, पूर्व्वनैषधे २ सर्गः ।
"स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः ।
यमवाप्य विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकाम् ॥"
( यथा च रघुः । ५ । ६० ।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान् ॥" * ॥
पुं, नृपविशेषः । स च ज्यामघात् शैब्यायां जातः । अस्य कुशक्रथलोमपादाः पुत्राः । यथा, भागवते । ९ । २४ । १ ।
"तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ ।
तृतीयं रोमपादञ्च विदर्भकुलनन्दनम् ॥"
अस्य नाम्नैव विदर्भनगरी समुत्पन्ना ॥ मुनिविशेषः । यथा, हरिवंशे । १९६ । ८४ ।
"द्वैपायनो विदर्भश्च जैमिनिर्माठरः कठः ॥" )

विदर्भजा, स्त्री, (विदर्भे जायते इति । जन + डः ।) अगस्त्यपत्नी । तत्पर्य्यायः । कौशीतकी २ लोपामुद्रा ३ । इति त्रिकाण्डशेषः ॥ दमयन्ती । यथा, पूर्व्वनैषधे २ सर्गः ।
"धृतलाञ्छनगोमयाञ्चनं
विधुमालेपनपाण्डुरं विधिः ।